# २ वाणिज्यतः साम्राज्यं यावत्
## संस्थायाः सत्तास्थापनम्

औरङ्गजेबः मुगलसम्राट्सु अन्तिमः शक्तिशाली सम्राट् (बादशाह) आसीत् । सः तात्कालिकभारतस्य एकस्मिन् महति भूभागे शासनम् अकरोत् । सप्ताधिकसप्तदशशत-तमे (1707) वर्षे तस्य मृत्योः पश्चात् अनेके मुगलप्रान्ताधिपाः (मुगलसरदार) महान्तः भूस्वामिनः (जमींदार) च स्वशक्तिं प्रदर्शितवन्तः । ते भूस्वामिनः प्रान्ताधिपाः च स्वीयानि क्षेत्रीयाणि राज्यानि (रियासतें) अपि स्थापितवन्तः । कालक्रमेण यथा विभिन्नभागेषु शक्तिसम्पन्नानि क्षेत्रीयराज्यानि (रियासतें) प्रकाशपथम् आगतानि तथा देहली अधिककालं यावत् प्रभाविकेन्द्ररूपेण न स्थातुं शक्तवती ।

अष्टादशशताब्दस्य उत्तरार्धं यावत् राजनैतिकक्षितिजे आङ्ग्लीयानां रूपेण काचित् नूतना शक्तिः विकसितुम् आरब्धवती आसीत् । किं भवन्तः जानन्ति यत् आङ्ग्लीयाः सर्वप्रथमं कस्याश्चित् लघुवाणिज्यिक-संस्थायाः माध्यमेन भारतम् आगतवन्तः आसन् किञ्च तेषाम् अत्रत्यं भूभागम् अधिग्रहीतुम् अधिका रुचिः न आसीत् इति ? पुनः एतादृशं कथम् अभवत् यत् कस्मिंश्चित् दिने ते एतस्य विशाल-साम्राज्यस्य स्वामिनः सञ्जाताः ? एतस्मिन् अध्याये भवन्तः द्रक्ष्यन्ति यत् एतत् सर्वं कथम् अभवत् ? इति ।



**चित्रम् -1** सेनानायकेन (कैप्टन) हडसनवर्येण बहादुरशाहजफरस्य तस्य पुत्राणां च निग्रहणं कृतम् ।

औरङ्गजेबात् पश्चात् कश्चिदपि मुगलसम्राट् तथा शक्तिशाली तु न अभवत् पुनरपि प्रतीकरूपेण मुगलसम्राजां महत्त्वं पूर्ववत् एव आसीत् । यदा सप्तपञ्चाशदधिकाष्टादशशततमे (1857) वर्षे ब्रिटिशशासनं विरुध्य महती क्रान्तिः प्रारब्धा तदा विद्रोहिणः मुगलसम्राजं बहादुरशाहजफरम् एव स्वनेतृरूपेण अङ्गीकृतवन्तः । यदा विद्रोहः अभिमर्दितः, तदा संस्थाजनाः बहादुरशाहजफरं देशं परित्यक्तुं बाध्यम् अकुर्वन् तथा च तस्य (बहादुरशाहजफरस्य) पुत्रान् तस्य पुरतः एव हतवन्तः ।




**चित्रम् २** – अष्टादशशताब्द्यां भारतम् आगन्तुं मार्गाः।

## पूर्वदिशि ईस्ट-इण्डिया-संस्थायाः(कम्पनी) आगमनम्

षोड्शशततमे (1600) ख्रिस्ताब्दे ईस्ट-इण्डिया-संस्थया इङ्ग्लैण्डस्य महाराज्ञ्याः एलिजाबेथप्रथमायाः चार्टर अर्थात् स्वीकृतिपत्रं (इजाजतनामा) प्राप्तम् । तेन संस्थया पूर्वदिशि वाणिज्यस्य आरम्भं कर्तुम् एकाधिकारः प्राप्तः । एतस्य स्वीकृतिपत्रस्य अयम् अभिप्रायः आसीत् यत् इङ्ग्लैण्डस्य काचित् अन्या वाणिज्यिकसंस्था एतस्मिन् वाणिज्यिकक्षेत्रे ईस्ट-इण्डियासंस्थया सह न स्पर्धितुं शक्नोति स्म। एतस्य आज्ञापत्रस्य (चार्टर) साहाय्येन संस्था पारेसमुद्रं गत्वा वाणिज्याय नूतनकार्यक्षेत्राणि अन्वेष्टुं शक्नोति स्म, ततः च अल्पमूल्येन वस्तूनि क्रीत्वा तानि यूरोपीयदेशेषु अधिकमूल्येन विक्रेतुं शक्नोति स्म। वाणिज्यिकसंस्थायाः (व्यापारिक कम्पनी) अन्याभिः आङ्ग्लवाणिज्यिक-संस्थाभिः सह वाणिज्यिक-प्रतिस्पर्धायाः भयं न आसीत् । तस्मिन् काले वाणिज्यिकसंस्थाः सामान्येन प्रतिस्पर्धाम् अकृत्वा एव लाभांशं (मुनाफा) प्राप्तुं शक्नुवन्ति स्म। यदि कश्चित् ईस्ट-इण्डिया-संस्थायाः प्रतिस्पर्धी न भवेत् तर्हि एव संस्थाः न्यूनमूल्येन वस्तूनि क्रीत्वा तानि वस्तूनि अधिकमूल्येन विक्रेतुं शक्नुवन्ति स्म।

**वाणिज्यिकम्** - कश्चित् एतादृशः व्यवसायिकोद्यमः यस्मिन् वस्तूनि न्यूनमूल्येन क्रीत्वा अधिकमूल्येन च विक्रीय अर्थात् मुख्यरूपेण वाणिज्येन लाभांशः (मुनाफा) अर्ज्यते।

परन्तु एषः राजकीयाभिलेखः अन्ययूरोपीय-वाणिज्यिक-संस्थाः पूर्वदिशि विद्यमानेषु महाहट्टेषु आगमनात् न वारयितुं शक्नोति स्म । यावत्पर्यन्तम् इङ्लैण्डदेशीयाः जलपोताः अफ्रीकायाः पश्चिमतटं स्पृशन्तः केप-आफ-गुड-होपं परिभ्रम्य पारेहिन्दमहासागरं प्राप्ताः, तावत्पर्यन्तं पुर्तगालिनः भारतस्य पश्चिमतटे स्वीयम् उपस्थापनम् अकुर्वन्। ते गोवायां निजाश्रयस्थलीम् अकुर्वन्। पुर्तगालस्य अनुसन्धाता यात्री वास्को-दि-गामा एव अष्टनवत्यधिकचतुर्दशशततमे (1498) वर्षे प्रथमवारं भारतपर्यन्तं प्राप्तुम् एतं सामुद्रमार्गम् अन्वेष्टवान् आसीत्। सप्तदशशताब्दस्य आरम्भं यावत् डचवासिनः अपि हिन्दमहासागरस्य तट-वर्त्ति-स्थलेषु वाणिज्यस्य आरम्भं कर्तुं सम्भावनाः अन्वेष्टुम् आरब्धवन्तः । किञ्चित्कालानन्तरम् एव फ्रांसीसिवणिजः अपि प्रकाशपथम् आगतवन्तः।

समस्या इयम् आसीत् यत् सर्वाः वाणिज्यिकसंस्थाः सदृशानि एव वस्तूनि क्रेतुम् इच्छन्ति स्म इति । यूरोपीयमहाहट्टेषु भारतनिर्मितानां सूक्ष्म–कार्पासिक-वस्त्राणां कौशेयस्य च पर्याप्ताभियाच्ञा आसीत्। एतत् अतिरिच्य कृष्णमरीचिका-लवङ्ग-एला-त्वक्सारादीनाम् अपि अभियाञ्चा आधिक्येन आसीत् । यूरोपीयसंस्थासु जातप्रतिस्पर्धायाः कारणात् भारतीयविपणिषु एतेषां वस्तूनां मूल्यवृद्धेः आरम्भः जातः, तस्मात् कारणात् प्राप्यमाणः लाभांशः च क्रमशः न्यूनताम् अगच्छत्। अधुना एतासां वाणिज्यिकसंस्थानां वर्धनस्य विकासस्य च एकः एव मार्गः आसीत् यत् एताः संस्थाः स्वप्रतिस्पर्धि-संस्थाः नाशयेयुः इति । परिणामतः विपणीनाम् अधिग्रहणस्य स्पर्धावशात् वाणिज्यिकसंस्थासु परस्परं

युद्धानि आरब्धानि । सप्तदशाष्टदशशताब्दयोर्मध्ये या काऽपि संस्था प्राप्ते अवसरे अपरस्याः संस्थायाः समुद्रीयपोतं निमज्जयति स्म, मार्गेषु च बाधाः उत्पादयति स्म सामग्रीपूरितपोतान् च अग्रे गमनात् वारयति स्म । एतत् वाणिज्यम् अस्त्रशस्त्रबलेन प्रवर्तते स्म, तथा च व्यापारिकचतुष्पीठाः ( व्यापारिक चौकियां) दुर्गेण सुरक्ष्यन्ते स्म ।

स्ववसतीः दुर्गावृत्ताः कर्तुं वाणिज्येन च लाभम् अर्जयितुं संस्थायाः इत्येतादृशानि कार्याणि दृष्ट्वा संस्थायाः स्थानीयशासकानां च मध्ये कलहस्य स्थितिः उत्पन्ना। अनेन प्रकारेण वाणिज्यस्य राजनीतेः च अन्योऽन्यस्मात् पृथक् स्थापनं संस्थायै(कम्पनी) कठिनतां जनयति स्म। आगच्छन्तु, पश्यामः, एतत् सर्वं कथम् अभवत् ?

## ईस्ट-इण्डिया-संस्था बङ्गाले वाणिज्यम् आरभते।

प्रथमम् आङ्ग्लीयम् उद्योगागारं (फैक्टरी) एकपञ्चाशदधिकषोडशशततमे (1651) वर्षे हुगलीनद्याः तटे आरब्धम् । संस्थायाः वणिजः अनेन एव स्वकार्याणि साधयन्ति स्म । एते वणिजः तस्मिन् काले "फैक्टर" इति उच्यन्ते स्म । एतेषाम् उद्योगागाराणाम् आभ्यन्तरे भाण्डागारम् (वेयरहाउस इति) आसीत् यत्र निर्याताय वस्तूनि सङ्गृह्यन्ते स्म । अत्रैव संस्थायाः कार्यालयाः आसन् येषु संस्थायाः अधिकारिणः तिष्ठन्ति स्म । कालक्रमेण यदा वाणिज्यं वर्धितं तदा संस्थया वणिजः क्रेतारः विक्रेतारः च उद्योगागाराणां समीपे एव वसितुं प्रेरिताः । षण्णवत्यधिक-एकोनविंशतिशततमे (1996) वर्षं यावत् संस्था जनवसतीः परितः एकस्य दुर्गस्य निर्माणम् आरब्धवती आसीत् । वर्षद्वयानन्तरं संस्था मुगलाधिकारिभ्यः उत्कोचं दत्त्वा ग्रामत्रयस्य स्वामित्वम् अपि प्राप्तवती। तस्मिन् ग्रामत्रये एकः ग्रामः "कालीकाता" इति आसीत् यः अनन्तरकाले कलकत्ता इति नाम्ना प्रख्यातः। वर्तमानकाले एषः कलकत्ता इति नाम्ना एव अभिधीयते। संस्था मुगलसम्राजम् औरङ्गजेबम् एतस्य प्रस्तावस्य विषये सहमतम् अकरोत् यत् सः संस्थायै अशुल्कं दत्त्वैव वाणिज्याय आदेशं (फरमान) दद्यात् इति।

**फरमान** – कश्चित् राजकीयादेशः

संस्था अधिकाधिकजनपदान् अधिग्रहीतुं पूर्वतः च एव वर्तमानानाम् अनेकेषाम् अधिकाराणां माध्यमेन आधिक्येन लाभग्रहणे संलग्ना आसीत् । उदाहरणार्थम् औरङ्गजेबस्य आदेशानुसारं (फरमान) केवलं संस्थायाः पार्श्वे एव मुक्तवाणिज्यं कर्तुम् अधिकारः आसीत् । संस्थायाः ये अधिकारिणः व्यक्तिगतरूपेण वाणिज्यं कुर्वन्ति स्म, तेभ्यः एतादृशी स्वतन्त्रता नासीत् । परन्तु तादृशैः वणिग्भिः अपि शुल्कम् अर्पयितुं निराकृतम्। एतस्मात् कारणात् बङ्गाले राजस्वग्रहणं न्यूनम् अभवत्। अतः पुनः एतस्यां स्थितौ बङ्गालस्य शासकः मुर्शिदकुलीखानः विरोधं कस्मात् न कुर्यात्? अर्थात् निश्चयेन करिष्यति एव।



**तृतीयं चित्रम्** – मद्रासस्य जलपोतैः सामग्रीम् आनयन्त्यः स्थानीयनौकाः, विलियम-सिम्पसनद्वारा निर्मितं चित्रम्, सप्तषष्ठ्यधिकाष्टादशशत-तमवर्षम् (1867)।



**चित्रम् 4** – राबर्टक्लाइबः।

**(काष्ठपुत्तलिका) कठपुतली** – एतत् किञ्चित् क्रीडनकं भवति यत् अस्माभिः सूत्रबलेन स्वेच्छया नर्त्यते। यः कोऽपि जनः कस्यचित् अन्यस्य सङ्केतैः व्यवहरति तादृशं जनम् उपहसितुं प्रायः अन्ये जनाः तं "काष्ठपुत्तलिकारूपं वदन्ति अथवा अन्यैः जनैः तस्मै "काष्ठपुत्तलिका" इति पदस्य प्रयोगः क्रियते।

## वाणिज्यतः युद्धानि यावत्

अष्टादशशताब्दस्य आरम्भे संस्थायाः बङ्गालशासकानां च मध्ये पारस्परिककलहः आधिक्येन अवर्धत। औरङ्गजेबस्य मृत्योः पश्चात् बङ्गालस्य शासकाः स्वीयशक्तिं प्रदर्शयितुम् आरब्धवन्तः। तस्मिन् काले अन्यक्षेत्रीयशक्तीनां स्थितिः अपि तादृशी एव आसीत्। मुर्शिदकुलीखानात् पश्चात् अलीबर्दीखानः तदनन्तरं च सिराजुद्दौलाः बङ्गालस्य शासकः जातः। एते सर्वे शक्तिशालि-शासकाः आसन्। ते संस्थायै राज्यानि (रियासतें) दातुं निराकृतवन्तः। शक्तिसम्पन्नशासकैः वाणिज्यिकाधिकारस्य प्रतिदाने संस्थातः उपहार-रूप-वस्तूनि (नजराना) याचितानि। शासकैः संस्थायै मुद्रानिर्माणस्य अधिकारः न दत्तः, तथा च संस्थायाः दुर्गनिर्माण-कार्यक्रमे अपि प्रतिबन्धः स्थापितः। संस्था अस्मान् शासकान् वञ्चयति इति एतादृशैः आरोपैः संस्थाम् आरोपयन्तः शासकाः इदं तर्कम् उपस्थापितवन्तः, यत् संस्थायाः कारणात् बङ्गालसर्वकारस्य राजस्वं न्यूनं जायते, तथा च शासकानां शक्तिः क्षीयमाणा अस्ति इति। संस्था राजस्वम् प्रत्यर्पयितुं सन्नद्धा न आसीत्, तस्याः ईस्ट-इण्डिया-संस्थायाः (कम्पनी) अधिकारिभिः शासकेभ्यः अपमानजनकपत्राणि लिखितानि तैः पत्रैः च संस्थाधिकारिणः तान् शासकान् तेषां शासकानां च अधिकारिजनान् अपि अपमानयितुं प्रयत्तवन्तः।

संस्थायाः अभिमतम् आसीत् यत् स्थानीयाधिकारिणाम् अतार्किकाभिः अभ्यर्थनाभिः संस्थायाः वाणिज्यस्य क्षतिः भवति इति। संस्थायाः चिन्तनम् आसीत् यत् वाणिज्यं तदा वर्धितुं शक्नोति यदा सर्वकारः शुल्कम् अपाकुर्यात्। संस्थायाः एतस्मिन् तथ्ये विश्वासः आसीत् यत् स्वीयं वाणिज्यं वर्धयितुं संस्थया स्वीयः जनशक्तिः अपि वर्धनीया भविष्यति इति। ग्रामाः क्रेतव्याः भविष्यन्ति दुर्गाणां च पुनर्निर्माणं कारणीयं भविष्यति। एतादृशाः पारस्परिककलहाः अनुदिनं गभीररूपेण प्रवर्तमानाः आसन्, अन्ततः एतेषां पारस्परिकविघट्टनानां (टकराव) परिणतिः प्लास्याः प्रसिद्धयुद्धरूपेण अभवत्।

## प्लास्याः युद्धम्

षट्पञ्चाशदधिकसप्तदशशततमे (1756) वर्षे अलीवर्दीखानस्य मृत्योः पश्चात् सिराजुद्दौलाः बङ्गालस्य शासकः जातः। संस्था सिराजुद्दौला इति नामधेयस्य शक्तेः अतीव भयभीता आसीत्। सिराजुद्दौला-स्थाने संस्था तादृशं "काष्ठपुत्तलिकारूपं" (कठपुतली) शासकम् इच्छति स्म यः संस्थायै वाणिज्यिक-राज्यानि अन्यसुविधाः च सारल्येन दद्यात्, एतादृशेषु विषयेषु च असहमतिं न प्रकटयेत्। संस्था प्रयासम् अकरोत् यत् सिराजुद्दौलः प्रतिद्वन्द्विषु शासकत्वेन कस्यचित् नियुक्तिः भवेत् इति परन्तु संस्था एतस्मिन् कर्मणि साफल्यं न अवाप्नोत्। संस्थायाः एतादृशं व्यवहारं दृष्ट्वा प्रतिक्रियां कुर्वन् सिराजुद्दौलाः आदिशत् यत् संस्था तस्य राज्यस्य राजनैतिकविषयेषु हस्तक्षेपं न कुर्यात्, दुर्गनिर्माणप्रक्रियां स्थगयेत् नियमानुसारं राजस्वं च अर्पयेत्। यदा द्वौ पक्षौ परस्परम् अन्योऽन्येषां प्रतिभूतीः न स्वीकृतवन्तौ तदा शासकेन सिराजुद्दौलवर्येण स्वीयैः त्रिंशत्-सहस्रं (30,000) सैनिकैः सह कासिम-महाहट्ट-स्थिते आङ्ग्लोद्योगागारे (अंग्रेजी फैक्ट्री) आक्रमणं कृतम्। शासकस्य सिराजुद्दौला-सैनिकैः

**किं भवन्तः जानन्ति स्म ?**

किं भवन्तः जानन्ति स्म यत् प्लासी इति नामकरणं कस्मात् कारणात् अभवत् ? वस्तुतः एतस्य स्थानस्य वास्तविकं नाम "पलाशी" इति आसीत् परन्तु आङ्ग्लीयाः तत्र विकृतिम् उत्पाद्य प्लासी इति कृतवन्तः। पलाशपुष्पाणां बाहुल्यात् एतस्य स्थानस्य नाम पलाशी इति आसीत्। पलाशस्य मनोहरैः रक्तपुष्पैः च गुल्लालः निर्मीयते होलिकोत्सवे च तस्य प्रयोगः भवति।



**चित्रम् 5** – महान्यायालयकक्षः, ईस्ट-इण्डिया-हाउस, लेडनहाल – स्ट्रीट इति।

ईस्ट-इण्डिया-संस्थायाः कोर्ट-आफ –प्रापराइटर्स इत्यस्य लन्दनस्थिते लेडनहालस्ट्रीट इत्यस्मिन् निर्मिते ईस्ट-इण्डिया – हाउस इत्यस्मिन् भवने उपवेशनानि भवन्ति स्म। एतादृश्याः एव कस्याश्चित् सभायाः एतत् चित्रम् अस्ति।

संस्थायाः अधिकारिणः निगडिताः, वस्तुभाण्डागारे च तालकं स्थापितम्, आङ्ग्लीयानाम् अस्त्राणि परिहृतानि, आङ्ग्लजलपोताः च अपि अधिगृहीताः । तदनन्तरं शासकः सिराजुद्दौलाः संस्थायाः कलकत्तास्थिते दुर्गे आक्रमणं करिष्यामि इति धिया कोलकात्तां प्रति प्रस्थितवान्।

कलकत्तानगरम् अपि अस्माकम् अधिकारक्षेत्रात् बहिर्भूतं भविष्यति इति सूचनायां श्रुतायां मद्रासे नियुक्ताः संस्थाधिकारिणः अपि राबर्टक्लाइवस्य नेतृत्वे स्वकीयां सेनां तत्र प्रेषितवन्तः । इयं सेना नौसैनिकयुद्धपोतस्य साहाय्यम् अपि प्राप्नोति स्म । तदनन्तरं शासकेन सह रणाङ्गणे चिरकालं यावत् वणिग्वृत्तिः (सौदेबाजी) प्राचलत्। अन्ततो गत्वा सप्तपञ्चाशदधिकसप्तदशशततमे (1757) वर्षे राबर्टक्लाइवः प्लास्याः क्रीडाक्षेत्रे सिराजुद्दौलावर्यं विरुध्य संस्था-सेनायाः नेतृत्वम् अकरोत् । शासकस्य सिराजुद्दौलावर्यस्य पराजयस्य किमपि महत्कारणं तस्य सेनापतिषु कस्यचित् एकस्य सेनापतेः मीरजाफरस्य आङ्ग्लीयान् प्रति सहृदयतापूर्णः व्यवहारः आसीत्। मीरजाफरनिर्देशितैः सैन्यदलैः युद्धे भागः न गृहीतः । राबर्टक्लाइबः सिराजुद्दौलावर्यं शासकपदात् निष्कास्य तं मीरजाफरम् इदम् उक्त्वा स्वपक्षे अनयत् सः तस्मै (मीरजाफराय) शासकपदं दास्यति।

स्रोतः -1

## संपन्नतायाः आश्वासनम्

इङ्लैण्डजनाः ईस्ट-इण्डिया-संस्थायाः शासकीय-महत्त्वकाङ्क्षाः सन्देहेन अविश्वासपूर्णभावेन च पश्यन्ति स्म । प्लासीयुद्धात् पश्चात् राबर्टक्लाइवः आङ्ग्लसम्राजः कस्मैचित् मुख्यविदेशमन्त्रिणे विलियमपिटाय जनवरीमासस्य एकोनषष्ट्यधिकसप्तदशशततमे (1759) वर्षे कलकत्तानगरतः इदं पत्रं प्रेषितवान् –

> परन्तु एतावती विशालसत्ता कस्याश्चित् वाणिज्यिकसंस्थायाः कृते महती उपलब्धिः स्यात् – अहं स्वयम् इदं विचिन्त्य हर्षातिरेकेन अभिभूतः अस्मि--- एतानि समृद्धराज्यानि अधिग्रहीतुं कापि समस्या न भविष्यति। --- अधुना एतद्विषयकं निर्णयं भवदाधीनं करोमि यत् किं विंशतिलक्ष-वैदेशिकमुद्राणां (स्टर्लिन) वार्षिकायः प्रान्तत्रयस्य च अधिग्रहणं – कश्चित् एतादृशः विषयः अस्ति यस्मिन् एतावान् कोलाहलः उचितः स्यात् इति --।

**शासकोक्ताः आक्षेपाः**

त्रयस्त्रिंशदधिकसप्तदशशततमे (1733) वर्षे बङ्गालस्य शासकेन आङ्ग्लवणिजां विषये इदम् उक्तम् आसीत् –

यदा ते वणिजः प्रथमवारम् अस्माकं देशम् आगच्छन् तदा ते सर्वकारस्य पुरतः विनयपुरस्सरम् अवदन् यत् तेभ्यः कस्यश्चित् एकस्य उद्योगागारस्य स्थापनाय अत्यल्पभूमिः दातव्या इति। अस्माभिः तेभ्यः भूमिः तु दत्ता परन्तु ते तत्र सुदृढदुर्गं निर्मापितवन्तः। दुर्गं परितः गहनपरिखाः निर्मापिताः याः नदीं यावत् प्रसृताः आसन्। न जाने ते भित्तिषु कियन्ति आग्नेयास्त्राणि स्थापितवन्तः। ते अनेकान् वणिजः जनान् च स्वायत्तीकृतवन्तः, लक्षाधिकरूप्यकाणि राजस्वरूपेण गृह्णन्ति – ते असङ्ख्यकान् पुरुषान् महिलाः च तेषाम् एव देशे क्रीतदासवत् लुण्ठन्ति।

प्लास्याः युद्धम् एतस्मात् कारणात् महत्त्वपूर्णं मन्यते यतो हि अस्मिन् युद्धे भारते ईस्ट-इण्डिया-संस्थायाः एषः प्रथमजयः आसीत्। प्लास्याः युद्धात् पश्चात् सिराजुद्दौलाः मारितः मीरजाफरः च शासकरूपेण स्थापितः। संस्था अधुना अपि शासनस्य दायित्वं सम्भालयितुं सज्जा न आसीत्। तस्याः मूलोद्देश्यं तु वाणिज्यस्य विस्तारः आसीत्। यदि एतत् कार्यं स्थानीयशासकानां साहाय्येन युद्धं विना एव सिद्ध्येत् तर्हि एतदर्थं साक्षात् राज्यम् अधिग्रहीतुं का आवश्यकता ? इति चिन्तनं संस्थायाः आसीत्।

शीघ्रमेव ईस्ट-इण्डिया-संस्था अनुभूतवती यत् अयम् उपायः अपि सरलः नास्ति। "काष्ठपुत्तलिकारूपशासकाः" (कठपुतली) अपि सदा एव संस्थायाः निर्देशानुसारं न व्यवहरन्ति स्म। वस्तुतः तैः अपि स्वप्रजायाः दृष्टौ सम्मानस्य संप्रभुतायाः च प्रदर्शनं करणीयं भवति स्म।

पुनः एतस्याम् अवस्थायां संस्था किं कुर्यात् ? यदा मीरजाफरेण संस्थायाः विरोधः कृतः, तदा संस्था तम् अपाकृत्य तस्य स्थाने मीरकासिमं शासकपदे नियुक्तवती। यदा मीरकासिमः संस्थां बाधितुम् आरब्धवान् तदा बक्सरयुद्धे सप्तषष्ट्यधिकसप्तदशशततमे (1763) वर्षे सः अपि संस्थया पराजितः। संस्थया सः बङ्गालतः बहिष्कृतः मीरजाफरः च पुनः शासकरूपेण घोषितः। अधुना संस्थया शासकाय प्रतिमासं पञ्चलक्षं रूप्यकाणि दातव्यानि भवन्ति स्म। संस्था स्वसैनिकव्ययार्थं वाणिज्यिकावश्यकताभ्यः अन्यबहुविधव्ययान् च निर्वोढुम् इतोऽपि अधिकधनम् इच्छति स्म। संस्था आधिक्येन क्षेत्राणि धनार्जनं च इच्छति स्म। पञ्चषष्ट्यधिकसप्तदशशततमे (1765) वर्षे मीरजाफरः दिवङ्गतः तस्मिन् काले संस्थायाः विचारधारा सर्वथा परिवर्तिता आसीत्। काष्ठपुत्तलिकारूपशासकैः सह स्वस्य अप्रियानुभवान् पश्यन् क्लाइवः अघोषयत् यत् अधुना अस्माभिः स्वयमेव शासकपदे भवितव्यं भविष्यति इति।

अन्ततः पञ्चषष्ट्यधिकसप्तदशशततमे (1765) वर्षे मुगलसम्राजा ईस्ट-इण्डिया-संस्था एव बङ्गालप्रान्तस्य प्रान्ताधिपतित्वेन (दीवान) नियुक्ता। अधिकारप्राप्तेः पश्चात् संस्था बङ्गालस्य विशालराजस्वसंसाधनानाम् उपरि नियन्त्रणाधिकारं प्राप्नोत्। अनेन प्रकारेण संस्थायाः काचित् पुरातनसमस्या समाहिता। अष्टादशशताब्दस्य आरम्भात् एव भारतेन सह संस्थायाः वाणिज्यं निरन्तरं वर्धते स्म। परन्तु संस्थया भारते अधिकवस्तूनि ब्रिटेनतः आनीतस्य सुवर्णस्य प्रतिदानेन क्रेतव्यानि भवन्ति स्म। यतो हि ब्रिटेनस्य समीपे भारते विक्रेतुं किम् अपि वस्तु न आसीत्। प्लासीयुद्धात् पश्चात् ब्रिटेनतः आगम्यमानस्य सुवर्णस्य मात्रा न्यूना जाता तथा च बङ्गालस्य आधिग्रहणस्य पश्चात् तु ब्रिटेनतः सुवर्णानयनस्य आवश्यकता एव न आसीत्। अधुना भारते जायमानेन धनार्जनेन एव संस्था स्वव्ययनिमित्तकं धनम् अर्जयितुं शक्नोति स्म। अनेन धनार्जनेन संस्था भारते कार्पासकौशेयपटं क्रेतुं, स्वसैन्यव्ययनिमित्तकं धनं च प्राप्तुं शक्नोति स्म तथा च दुर्गाणां कार्यालयानां च निर्माणार्थं जायमानं व्ययभारं सोढुं शक्नोति स्म।

## संस्थाधिकारिणः "शासकाः" (नबाव) जाताः

शासकः इति पदेन कः अभिप्रायः आसीत् ? एतस्य कश्चित् अभिप्रायः तु अयम् आसीत् यत् अधुना संस्था सत्ताशक्तिसम्पन्ना आसीत् इति। परन्तु शासनस्य केचन अन्ये लाभाः अपि आसन्। अधुना संस्थायाः प्रत्येकं कर्मकरः शासकवत् जीवितुं तथाविधान् च स्वप्नान् द्रष्टुम् आरब्धवान्।

प्लास्याः युद्धात् पश्चात् बङ्गालस्य वास्तविकशासकाः एतत् तथ्यं स्वीकर्तुं बाध्याः कृताः यत् ते संस्थायाः अधिकारिभ्यः व्यक्तिगतरूपेण उपहाररूपभूमिं बहुधनं च दद्युः इति। स्वयं राबर्टक्लाइबेन एव भारते अपरिमितसम्पत्तिः संगृहीता। त्रिचत्वारिंशदधिकसप्तदशशततमे (1741) वर्षे यदा सः इङ्ग्लैण्डदेशतः मद्रासं (वर्तमान-चैन्नैमहानगरम्) आगतवान् तदा सः अष्टादशवर्षीयः (18) आसीत्। सः अत्र भारते वारद्वयं राज्यपालपदे नियुक्तः, यदा सप्तषष्ठ्यधिकसप्तदशशततमे (1767) वर्षे सः राज्यपालपदात् सेवानिवृत्तः भूत्वा सर्वकालाय भारतात् इङ्लैण्डं प्रति प्रस्थितवान् तदा तत्र तस्य सम्पत्तिः एकाधिकचतुश्शतं, द्व्यधिकैकशतं (401,102) पौण्ड इति आसीत्। रोचकं तथ्यम् इदम् अस्ति यत् राज्यपालस्य स्वस्य द्वितीयस्मिन् कार्यकाले तस्मै संस्थाभ्यन्तरे व्याप्तस्य भ्रष्टाचारस्य समाप्तेः कार्यम् अर्पितम् आसीत्। परन्तु द्विसप्तत्यधिकसप्तदशशततमे (1772) वर्षे क्लाईबस्य उपरि एव ब्रिटिशसंसदा भ्रष्टाचारारोपणानि आरोपितानि, सः आत्मनः उपरि आरोपितानां भ्रष्टाचारारोपणानां विषये ब्रिटिशसंसदि स्पष्टीकरणं दातुं बाध्यः जातः। क्लाईबस्य अपरिमितसम्पत्तेः अर्जनस्रोतांसि अवैधरूपाणि सन्ति इति कारणात् सर्वकारः तं सन्देहदृष्ट्या पश्यति स्म। पुनः सर्वकारेण भ्रष्टाचारारोपेभ्यः तु क्लाईबः मोचितः, परन्तु चतुःसप्तत्यधिकसप्तदशशततमे (1778) वर्षे सः आत्महत्याम् अकरोत्।

संस्थायाः सर्वे अधिकारिणः क्लाइवः इव सम्पत्तेः एकत्रीकरणं न कर्तुं शक्तवन्तः। अनेके संस्थाधिकारिणः विविधरोगैः युद्धे च अल्पवयसि एव मृतवन्तः। एतत् अतिरिच्य ते सर्वे एव अधिकारिणः भ्रष्टाचारिणः असत्यनिष्ठाः च आसन् इति एतादृशं चिन्तनम् अपि अनुचितं स्यात्। तेषु संस्थाधिकारिषु अनेके अधिकारिणः साधारणकुटुम्बेभ्यः आसन्। एतादृशानाम् अधिकारिणां हार्दिकी इच्छा इयम् एव आसीत् यत् ते भारते समीचीनतया प्रभूतं धनम् अर्जयेयुः, तथा च ब्रिटेनं प्रति गत्वा सानन्दं जीवनं यापयेयुः इति। ये अधिकारिणः सकुशलं धनानि नीत्वा स्वदेशं प्रति गतवन्तः ते तत्र विलासितापूर्णं जीवनं यापितवन्तः। तान् अधिकारिणः तत्रत्याः जनाः "नबाव" इति शब्देन सम्बोधयन्ति स्म। इङ्लैण्डे प्रयुज्यमानः "नबाव"- शब्दः भारतीय-नवाब शब्दस्य एव आङ्ग्लरूपं प्राप्तवान्। तत्रत्याः जनाः प्रायः उपर्युक्तानाम् एतादृशानां जनानां गणनां नूतनधनाढ्येषु कुर्वन्ति स्म तथा च सामाजिकदृष्ट्या एते अल्पावधौ एव धनाढ्याः जाताः इति रूपेण तान् जनाः पश्यन्ति स्म। अन्यजनैः एतादृशानां धनाढ्यानां नाटक- व्यङ्ग्यचित्रादिमाध्यमेन उपहासः क्रियते स्म।

## संस्थायाः वर्धमानं शासनम्

यदि वयं चतुःषष्ठ्यसप्तदशशत - तमवर्षात् (1767) आरभ्य सप्तपञ्चाशदधिकाष्टादशशत- तमवर्षाभ्यन्तरे (1857) ईस्ट-इण्डिया-संस्थाद्वारा भारतीयराज्यानाम् अधिग्रहणस्य प्रक्रियां पश्येम तर्हि कानिचन महत्त्वपूर्णतथ्यानि पुरतः आयान्ति। कस्मिंश्चित् अपि अपरिचितक्षेत्रे संस्था साक्षात् आक्रमणं प्रायः न अकरोत्। ईस्ट-इण्डिया-संस्था कस्य अपि भारतीयराज्यस्य अधिग्रहणात् पूर्वं विभिन्नराजनैतिकानाम् आर्थिकानां कूटनीतिकसाधनानां च प्रयोगम् अकरोत्।

चतुःषष्ठ्यधिकसप्तदशशत-तमवर्षस्य (1764) बक्सर-युद्धात् पश्चात् संस्था भारतीयराज्येषु आवासीयाधिकारिणः (रेजिडेन्ट् इति ) नियोजितवती। एते अधिकारिणः संस्थायाः राजनैतिकाः वाणिज्यिकाः च प्रतिनिधयः भवन्ति स्म। तेषाम् आवासीयाधिकारिणां (रेजिडेन्ट्) कार्यं संस्थायाः हितरक्षणं वर्धापनं च आसीत्। रेजिडेन्टमाध्यमेन संस्थायाः अधिकारिणः भारतीयराज्यस्य आन्तरिकप्रकरणेषु

**क्लाइवः आत्मानं कथं पश्यति स्म ?**

क्लाइवः संसदः एकस्याः समितेः पुरतः चर्चाकाले उक्तवान् आसीत् यत् प्लास्याः युद्धात् पश्चात् सः बहुसंयमम् आचरितवान्। आगच्छन्तु, पश्यामः सः किम् अवदत् – तदानीन्तनीं स्थितिं मनसि कल्पयन्तु, यदा अहं प्लासीजयस्य समीपे आसम्! तदा कश्चित् बलवान् राजा मम पराधीनतायाम् आसीत्, एकं सम्पन्ननगरं मम दयाश्रितम् आसीत्। तस्य नगरस्य सर्वे धनाढ्याः महाजनाः च मम मोदाय प्रयतन्ते स्म। अन्योऽन्यं च एतस्मै कार्याय प्रेरयन्ति स्म। अहं तादृशे भाण्डागारे भ्रमामि स्म यत् केवलं मम कृते उद्घटितः आसीत् तस्मिन् भाण्डागारे च एकस्मिन् पक्षे सुवर्णम् आसीत् अपरस्मिन् पक्षे च बहुमूल्यमणयः आसन्! अध्यक्षमहोदय! अहं तदानीन्तने काले आत्मनः संयमावस्थां दृष्ट्वा स्वयम् आश्चर्यान्वितः अस्मि।

**➤ गतिविधिः**

कल्पयतु भवान् संस्थायाः युवाधिकारी अस्ति तथा च केभ्यश्चित् दिनेभ्यः भारतम् आगतवान् अस्ति। अधुना इङ्ग्लैण्डदेशस्थायै स्वमात्रे पत्रं विलिख्य अत्रत्यस्य स्वीय-विलासिता-पूर्णजीवनस्य विषये ज्ञापयतु तथा च स्वब्रिटेनस्थजीवनेन सह वर्तमानजीवनस्य तुलनां करोतु।



चित्रम् 6 – स्वपुत्रैः ब्रिटिश-रेजिडेन्टाधिकारिभिः च सह स्थितः शासकः शुजाउद्दौलाः, टिलीकैटलद्वारा रचितं चित्रम् (तैलः, द्विसप्तत्यधिकसप्तदशशततमवर्षम् (1772 ) । बक्सरयुद्धात् परं जातानां सन्धीनां परिणामतः शासकशुजाउद्दौलः अधिकांशाधिकाराः परिहृताः आसन्, परन्तु अत्र सः ब्रिटिश-रेजिडेन्टाधिकारिणः समक्षे स्वचिरपरिचितया राजसीमुद्रया दृश्यते।

अपि हस्तक्षेपं कर्तुम् आरब्धवन्तः आसन् । अग्रिमः शासकः कः भविष्यति ? कस्मिन् पदे कः उपवेक्ष्यति ? इति एतादृशान् विषयान् अपि संस्थाधिकारिणः एव निश्चेतुम् इच्छन्ति स्म । बहुधा संस्थया राज्येषु "सहायकसन्धिः" अपि बलात् आरोपितः । यानि राज्यानि एतादृशीं प्रबन्धनव्यवस्थाम् अङ्गीकुर्वन्ति स्म तादृशेभ्यः राज्येभ्यः स्वतन्त्रसेनास्थापनस्य अधिकारः न दीयते स्म । संस्थापक्षतः तेभ्यः सुरक्षाव्यवस्था दीयते स्म । तथा च "सहायकसेनायाः" संरक्षणाय स्थापनाय च संस्थायै राज्यानि धनं यच्छन्ति स्म । यदि भारतीयशासकाः धनस्य प्रत्यर्पणं कदाचित् न कर्तुं पारयन्ति स्म तदा दण्डस्वरूपं संस्था तत् तत्क्षेत्रम् अथवा राज्यं स्वाधिकृतं करोति स्म । उदाहरणार्थं यदा रिचर्ड-वेलेज्ली-गवर्नर-जनरलपदे अष्टनवत्यधिकसप्तदशशततमवर्षात् आरभ्य पञ्चाधिकाष्टादशशततमवर्षावधौ (1798-1805) आसीनः आसीत्, तदा अवधस्य शासकः स्वस्य अर्धक्षेत्रं संस्थायै अर्पयितुम् ईस्ट-इण्डिया-संस्थया बाध्यः कृतः यतोहि शासकः सहायकसेनायै धनं दातुं न शक्तवान् आसीत् । अनेन एव प्रकारेण संस्थया हैदराबादस्य अपि अनेकक्षेत्राणि परिहृतानि ।

स्रोतः - 4

### आवासीयकार्यकर्तुः (रेजिडेन्ट इत्यस्य) कीदृशं सामर्थ्यं भवति स्म ?

स्काटलैण्डस्य प्रसिद्धः अर्थशास्त्री राजनैतिकः दार्शनिकः च जेम्समिलः संस्थाद्वारा नियुक्तस्य रेजिडेन्ट्स इत्यस्य विषये इदम् उक्तवान् –

> वस्तुतः आवासीयाधिकारी (रेजिडेन्ट) राज्यस्य राजा भवति । वयं तस्मै अप्रतिरोधस्य स्वेच्छापूर्वकनिषेधाज्ञायाः च अन्तर्गतं कार्यं कर्तुं स्वातन्त्र्यं प्रयच्छामः । यावत्पर्यन्तं स्थानीयराजा सम्पूर्णतया अधीनस्थः भवति तथा च रेजिडेन्ट इति नामधेयस्य (आवासीयाधिकारी) अधिकारिणः अनुसारम् अथवा ब्रिटिशसर्वकारस्य अनुसारम् अनुकूलं च कार्यं करोति तावत्पर्यन्तं सर्वा व्यवस्था समीचीना आसीत् । शासनकार्येषु आवासीयाधिकारिणः (रेजिडेन्ट इत्यस्य) प्रतिरोधं विना एव सर्वं समीचीनतया चलति--- यदा पृथक्-तया किमपि आपतितं भवति, तथा च यदा राजा पृथक् मार्गम् आश्रयति तदा ब्रिटिशसर्वकारः तस्य नृपस्य तादृशम् आचरणम् अनुचितम् इति मन्यते तथा च तस्मिन् काले परस्परं विघटनं विरोधः विवादः च जायते ।
>
> जेम्स-मिलः(१८३२)

**निषेधाज्ञा** - निर्देशः ।
**अधीनस्थता** – दैन्यम् / नम्रीभावः ।

## टीपूसुल्तानः – "शेर-ए-मैसूर" इति



**चित्रम्** 7 - टीपूसुल्तानः

यदा ईस्ट-इण्डिया-संस्था स्वीय-राजनैतिकानाम् आर्थिकानां च हितानां ह्रास-रूपां विभीषिकाम् अपश्यत् तदा संस्थया प्रत्यक्षसैन्याक्रमणस्य मार्गः अपि अङ्गीकृतः । दक्षिणभारतीय-राज्यस्य मैसूरस्य उदाहरणेन इदं तथ्यम् अवगन्तुं शक्नुमः ।

हैदरालिनः ( शासनकालः एकषष्ठ्यधिकसप्तदशशत-तमवर्षात् (1761) द्व्यशीत्यधिकसप्तदशशत-तमवर्षं (1782) यावत् आसीत्) तस्य च विख्यातपुत्रस्य टीपूसुल्तानस्य शक्तिशालिशासकस्य (द्व्यशीत्यधिकसप्तदशशत-तमवर्षतः (1782 – 1799) नवनवत्यधिकसप्तदशशततमवर्षं यावत्) - नेतृत्वे मैसूरराज्यम् अतीव शक्तिसम्पन्नम् अभवत् । मालाबारतटे जायमानं वाणिज्यं मैसूरराज्यस्य नियन्त्रणे आसीत् यतः ईस्ट-इण्डिया-संस्था कृष्णमरीचिकाम् एलां च क्रीणाति स्म । पञ्चाशीत्यधिकसप्तदशशततमे



**चित्रम्** - 8 – टीपूसुल्तानस्य पुत्रौ बन्धकरूपेण कार्नवालिसस्य पुरतः प्रस्तूयेते । डेनियलार्मद्वारा चित्रितं चित्रम् एतत्,१७९३।

हैदराली टीपूसुल्तानः च ईस्ट-इंण्डिया-संस्थायाः सेनाम् अनेकधा युद्धे पराजितवन्तौ आस्ताम् । परन्तु द्विनवत्यधिकसप्तदशशततमे वर्षे (1792) मराठिनां हैदराबादनिजामस्य ईस्ट-इण्डिया-संस्थायाः च संयुक्तसैन्याक्रमणात् पश्चात् टीपूसुल्तानः आङ्ग्लीयैः सह सन्धिं कर्तुं बाध्यः जातः । एतस्य कृतसन्धेः अन्तर्गतं तस्य द्वौ पुत्रौ आङ्ग्लीयैः बन्धकरूपेण स्वपार्श्वे स्थापितौ । ब्रिटिशचित्रकाराः एतादृशानि दृश्यानि सानन्दं चित्रयन्ति स्म यैः चित्रैः आङ्ग्लसत्तायाः विजयः दर्श्यते स्म ।

वर्षे (1785) टीपूसुल्तानः स्वराज्ये विद्यमान-पोतस्थानकैः अथवा पत्तनैः जायमाने चन्दनकाष्ठस्य कृष्णमरीचिकायाः एलायाः च निर्याते प्रतिबन्धं स्थापितवान् । टीपूसुलतानेन स्थानीयवणिजः अपि ईस्ट-इण्डिया-संस्थया सह वाणिज्यं कर्तुं वारिताः आसन् । टीपूसुल्तानेन भारतवासिभिः फ्रांसीसिवणिग्भिः घनिष्ठसम्बन्धाः संवर्धापिताः स्थापिताः च, तेषां वणिजां साहाय्येन च तेन स्वसेनायाः आधुनिकीकरणम् अपि कृतम् ।

टीपूसुल्तानस्य एतादृशान् प्रयासान् दृष्ट्वा आङ्ग्लीयाः अतिकुपिताः सञ्जाताः । आङ्ग्लीयाः अनुभवन्ति स्म यत् टीपूसुल्तानः हैदराली च अतीव महत्त्वकाङ्क्षिणौ अभिमानिनौ भयङ्करौ च शासकौ स्तः इति । अतः एतादृशानां नृपाणां नियन्त्रणं तेषां दमनं पराभवं च आवश्यकम् अस्ति । परिणामतः मैसूरराज्येन सह आङ्ग्लीयानां वारचतुष्ट्यं युद्धम् अभवत् (एकोन सप्तषष्ट्यधिकसप्तदशशततमवर्षम् – एकोनसप्तत्यधिकसप्तदशशततमवर्षम्, (1767-1769 ), अशीत्यधिकसप्तदशशततमवर्षम् – चतुरशीत्यधिकसप्तदशशततमवर्षम् (1780-1784), नवत्यधिकसप्तदशशततमवर्षम् – द्विनवत्यधिकसप्तदशशततमवर्षम् (1790-1792), नवनवत्यधिकसप्तदशशततमवर्षम् (1799) । श्रीरङ्गपट्टमस्य अन्तिमयुद्धे ईस्ट-इण्डिया-संस्था(कम्पनी) साफल्यम् अवाप्नोत् । स्वीयां राजधानीं रक्षन् टीपूसुल्तानः दिवङ्गतः तदनन्तरं मैसूरस्य राजव्यवस्था पुरातन-वोडियार-राजवंशाय अर्पिता । अनेन सहैव मैसूरस्य उपरि अपि सहायकसन्धिः बलात् आरोपितः ।



चित्रम् -9 – टीपूसुल्तानस्य क्रीडनकं सिंहः ।

इदं टीपूसुल्तानस्य कस्यचित् विशालकायक्रीडनस्य चित्रम् अस्ति । एतस्मिन् चित्रे कश्चित् कृत्रिमसिंहः कञ्चित् यूरोपीयसैनिकम् आक्रम्य तिष्ठति । यदा एतस्य क्रीडनकस्य हस्तकलारूपम् उपकरणं परिभ्राम्यते स्म तदा कृत्रिमसिंहः गर्जति स्म अपि च सैनिकाभ्यन्तरात् अपि करुणक्रन्दनं श्रूयते स्म । अधुना एतत् क्रीडनकं लंदनस्थिते विक्टोरिया-एण्ड-एल्बर्ट-सङ्ग्रहालये स्थापितम् अस्ति । मै-मासस्य चतुर्थे दिनाङ्के नववत्यधिकसप्तदशशततमे (1799) वर्षे च यदा स्वराजधान्याः श्रीरङ्गपट्मस्य रक्षां कुर्वन् टीपूसुल्तानः दिवङ्गतः तदा आङ्ग्लीयाः एतत् क्रीडनकम् अपि सहैव नीतवन्तः ।

## टीपूसुल्तानस्य कथाः

नृपच्छविः प्रायः जनश्रुतिभिः इतोऽपि प्रभावशालिनी भवति । प्रचलितकथानकैः तस्य शक्तेः प्राचुर्येण यशोगानं क्रियते । द्व्यशीत्यधिकसप्तदशशततमे (1782) वर्षे मैसूरस्य राजपदालङ्कृतस्य टीपूसुल्तानस्य विषये उच्यते यत् एकदा सः स्वीयेन फ्रांसीयमित्रेण सह आखेटाय वनम् अगच्छत् । तत्र कश्चित् सिंहः तयोः पुरतः आगच्छत् । तयोः भुशुण्डी कार्ये सम्प्राप्ते निष्क्रिया जाता, असिः अपि भूमौ अपतत् । पुनरपि टीपूसुल्तानेन शस्त्ररहितेन एव सिंहेन सह युद्धं कृतम्, अन्ततः सः कथञ्चित् असिम् अपि उत्थापितवान् । अन्ते सः सिंहं हतवान् । एतस्याः घटनायाः पश्चात् एव तस्य ख्यातिः “शैर –ए-मैसूर इति नाम्ना जाता । तस्य राजपताकायाम् अपि सिंहस्य चित्रं चित्रितं भवति स्म ।

> **गतिविधिः**
>
> कल्पयन्तु, भवन्तः
> श्रीरङ्गपट्मयुद्ध- युक्तं टीपूसुल्तानमृत्युविषयकं च पुरातनं वार्तापत्रद्वयं प्राप्नुवन्ति। एकं वार्त्तापत्रं ब्रिटेनतः प्रकाशितम् अस्ति, अपरं च मैसूरतः प्रकाशितम् अस्ति। एतयोः द्वयोः वार्त्तापत्रयोः कृते उपर्युक्तप्रकाशितघटनानां विषये पृथक् पृथक् शीर्षकं लिखन्तु।

**कन्फेडरेसी** – घटबन्धनम्

## मराठासैनिकैः सह युद्धम्

अष्टादशशताब्दस्य अन्ते संस्था मराठाजनान् नियन्त्रयितुं तेषां च विनाशविषये चिन्तयितुम् आरभत। एकषष्ट्यधिकसप्तदशशततमे (1761) वर्षे पानीपतस्य तृतीययुद्धे पराजयात् पश्चात् देहलीतः देशस्य शासनं चालयिष्यामः इति मराठाजनानां स्वप्नः भग्नः जातः। ते अनेकराज्येषु विभक्ताः, एतेषां राज्यानां शासनं सिन्धिया-होलकर-गायकवाड-भोंसलेप्रभृतीनां पृथक् पृथक् राजवंशानाम् अधीने आसीत्। एते सर्वे सिन्धियादिप्रमुखाः (सरदार इति) सर्वोच्चमन्त्रिणः (पेशवा इत्यस्य) अन्तर्गताः राज्यमन्त्रिमण्डलीयाः सदस्याः (कन्फेडरेसी इति ) आसन्। सर्वोच्चमन्त्री एतस्य राज्यमन्त्रिमण्डलस्य सैनिकः प्रशासकीयप्रमुखः च भवति स्म सः च पुणेमध्ये निवसति स्म। महाद्जीसिन्धिया नानाफडनीसः च अष्टादशशताब्दस्य अन्तिमौ द्वौ मराठायोद्धारौ राजनीतिज्ञौ च आस्ताम्।

क्रमिकयुद्धेषु ईस्ट-इण्डिया-संस्था मराठासैनिकान् पराजेतुं पराभवितुं च बाध्यान् अकरोत्। प्रथमयुद्धं द्व्यशीत्यधिकसप्तदशशततमे (1782) वर्षे सालबायी इति सन्धिना सह समाप्तं, यस्मिन् कोऽपि पक्षः न अजयत्। द्वितीयाङ्ग्लमराठायुद्धं (त्र्यधिकाष्टादशशततमवर्षतः (1803) - पञ्चाधिकाष्टादशशततमवर्षे (1805) इति वर्षे अनेकेषु खातेषु अथवा अयनेषु (मोर्चा इति ) अभवत्। परिणामतः इदम् अभवत् यत् उडीसा यमुनायाः उत्तरभागे च स्थितम् आगरानगरं देहलीसहिताः अनेकभूभागाः च आङ्ग्लाधीनाः जाताः। अन्ततः सप्तदशाधिकाष्टादशशततमवर्षात् आरभ्य एकोनविंशत्यधिकाष्टादशशततमवर्षाभ्यन्त (1817-1819) जायमाने तृतीये आङ्ग्लमराठायुद्धे आङ्ग्लीयैः मराठासैन्यबलं सर्वथा भूमिसात् कृतम्। (सर्वोच्चमन्त्री) (पेशवा इति) पुणेतः अपाकृत्य कर्णपुरस्य समीपे बिठूरे सेवानिवृत्तिवेतने प्रेषितः। अधुना बिन्ध्यस्य दक्षिणे स्थिते सम्पूर्णे भूभागे ईस्ट-इण्डिया-संस्थायाः नियन्त्रणम् अभवत्।

## सर्वोच्चतायाः अभिकथनम् (दावा)

उपर्युक्त-विवरणेन स्पष्टम् अस्ति यत् एकोनविंशशताब्दस्य आरम्भात् एव ईस्ट-इण्डिया-संस्था क्षेत्रीयविस्तारस्य आक्रामकनीतेः अनुसारं व्यवहरति स्म। लार्डहेस्टिंग्सः त्रयोदशाधिकाष्टादशशत-तमवर्षात् (1813) त्रयोविंशत्यधिकाष्टादशशततमवर्षं (1823) यावत् गवर्नरजनरलपदे आसीत्, तस्य नेतृत्वे "सर्वोच्चतायाः काचित् नूतना नीतिः ईस्ट-इण्डिया-संस्थया आरब्धा। ईस्ट-इण्डिया-संस्थायाः प्रतिज्ञा आसीत् यत् तस्याः सर्वोच्चसत्ता अस्ति, एतस्मात् कारणात् सा भारतीयराज्यानाम् अपेक्षया अधिकाधिकारसम्पन्ना अस्ति। ईस्ट-इण्डिया-संस्था स्वहितरक्षायै भारतीयराज्यानि अधिग्रहीतुं विभीषिकायाः अथवा भयदर्शनस्य (धमकी) च अधिकारः तस्याः समीपे अस्ति इति मन्यते स्म। एतादृशी अवधारणा अनन्तरकाले अपि आङ्ग्लनीतिषु दृश्यते।



**चित्रम्** – 10 - लार्डहेस्टिंग्सः।

परन्तु इयं प्रक्रिया अबाधगत्या न प्राचलत्। उदाहरणार्थं यदा आङ्ग्लीयाः कित्तूरस्य(वर्तमानकर्नाटकस्य) लघुराज्यम् अधिग्रहीतुं प्रयत्तवन्तः तदा तत्रत्यमहिष्या चेन्नम्मया सशस्त्रसङ्घर्षः आरब्धः, आङ्ग्लीयान् विरुध्य च सा आन्दोलनम् आरभत। सा चतुर्विंशत्यधिकाष्टादशशततमे (1824 )वर्षे आङ्ग्लीयैः निगडिता तथा च एकोनत्रिंशदधिकाष्टादशशततमे (1829) वर्षे कारागारे एव तस्याः मृत्युः अभवत्। चेन्नम्मायाः मृत्योः पश्चात् कित्तूरस्थितसंगोल्याः केनचित् निर्धनप्रहरिणा रायन्नावर्येण एतत् आन्दोलनं

यथावत् स्थापितम्। सर्वतः सः समर्थनम् साहाय्यं च प्राप्नोति स्म, तस्मात् कारणात् सः बहूनि ब्रिटिशशिबिराणि अभिलेखान् च नाशितवान्। अन्ततः तम् अपि आङ्ग्लीयाः गृहीत्वा त्रिंशदधिकाष्टादशशततमे (1830) वर्षे मृत्युदण्डेन दण्डितवन्तः। विरोधस्य एतादृशानि बहूनि उदाहरणानि भवन्तः एतस्मिन् एव पुस्तके अग्रे पठिष्यन्ति।



**चित्रम्**-11 महाराजस्य रणजितसिंहस्य राजसभा

त्रिंशदधिकाष्टादशशततम-दशकस्य (1830) अन्ते ईस्ट-इण्डिया-संस्था रूसस्य प्रभावात् अतीव भयभीता आसीत्। ईस्ट-इण्डिया-संस्थायाः भयम् आसीत् यत् कदाचित् रूसस्य प्रभावः सम्पूर्ण-एशियायां प्रसर्य उत्तरपश्चिमक्षेत्रेभ्यः भारतम् अपि स्वाधिपत्ये न स्थापयेत्। एतस्मात् भयात् एव आङ्ग्लीयाः इदानीम् उत्तरपश्चिमभारतस्य उपरि अपि स्वाधिपत्यं स्थापयितुम् इच्छन्ति स्म। ते अष्टत्रिंशदधिकाष्टादशशत-तमवर्षं (1838) द्विचत्वारिंशदधिकाष्टादशशत-तमवर्षं (1842) चान्तरा अफगानिस्तानेन सह दीर्घकालीनं युद्धम् अयुद्ध्यन्त तथा च तत्र अप्रत्यक्षसंस्थाशासनं स्थापितवन्तः। आङ्ग्लीयैः त्रिचत्वारिंशदधिकाष्टादशशततमे (1843) वर्षे सिन्धप्रान्तः अपि अधिगृहीतः। ततः परं पञ्चनदस्य क्रमः आसीत्। अत्र महाराजेन रणजीतसिंहेन ईस्ट-इण्डिया-संस्थायै मनोभिलाषं पूरयितुम् अवसरः न दत्तः। एकोनचत्वारिंशदधिकाष्टादशशततमे (1839) वर्षे रणजीतसिंहस्य मृत्युः अभवत्, तस्य मृत्योः पश्चात् पञ्चनद-राज्येन (रियासत) सह चिरकालं यावत् युद्धद्वयम् अभवत् अन्ततः एकोनपञ्चाशदधिकाष्टादशशततमे (1849) वर्षे आङ्ग्लीयैः पञ्चनदराज्यम् अपि अधिगृहीतम्।

## विलयनीतिः

अधिग्रहणस्य अन्तिमक्रान्तिरूप-लहरी (1848) षट्पञ्चाशदधिकाष्टादशशत-तमवर्षाभ्यन्तरे (1856) नियुक्तराष्ट्राध्यक्षस्य (गवर्नर-जनरल) लार्डडलहौजीवर्यस्य शासनकाले प्राचलत्। लार्डडलहौजी एकां नूतनां नीतिम् अङ्गीकृतवान् यस्यै सः विलयनीतिः इति नाम अददात्। एतस्याः नीतेः सिद्धान्तः अयम् आसीत् यत् यदि कस्यचित् शासकस्य मृत्युः भवति तथा च यदि तस्य शासकस्य कश्चित् उत्तराधिकारी पुरुषः नास्ति तर्हि तस्य राज्यस्य अधिग्रहणम् आङ्ग्लीयैः करिष्यते अर्थात् तत् राज्यम् "ईस्ट-इण्डिया-कम्पनी" इत्यस्य भूभागान्तर्गतं समाविष्टं भविष्यति इति। एतस्य नीतेः आधारेण क्रमशः सतारा (1848), संबलपुरम् (1850), उदयपुरम् (1852),नागपुरम् (1853) अपि च झांसी (1854)इत्यादीनि राज्यानि आङ्ग्लाधीनानि जातानि।

अन्ततः षट्पञ्चाशदधिकाष्टादशशत-तमवर्षे (1856) "ईस्ट-इण्डिया-कम्पनी" इति संस्था-द्वारा अवधः अपि स्वाधीनः कृतः। इदानीम् आङ्ग्लीयैः कश्चित् नूतनः तर्कः उपस्थापितः। ते अवदन् यत् अवधस्य जनतां तत्रत्यशासकस्य (नवाबस्य) कुशासनात् मोचयितुम् अस्माकं कर्तव्यम् अस्ति, अतः प्रतिबद्धाः भूत्वा वयम् अवधम् अधिग्रहीतुं बाध्याः स्मः ! स्वीयं प्रियशासकं राजसिंहासनात् अपसारितं दृष्ट्वा अवधस्य जनता क्रुद्धा जाता तथा च सा अपि सप्तपञ्चाशदधिकाष्टादशशततम-वर्षीये (1857) महाविद्रोहे सम्मिलिता।

**➤ गतिविधिः**

कल्पयतु, यत् भवान् शासकस्य भ्रातुस्पुत्रः अस्ति भवान् बाल्यात् एव बोधितः अस्ति यत् एकस्मिन् दिने भवान् राजसिंहासनारूढः भविष्यति। अधुना भवान् अवगच्छति यत् विलयनीतेः कारणात् आङ्ग्लीयाः भवन्तं राजसिंहासनस्य आरोहणात् वारयन्ति। भवान् तदा किम् अनुभविष्यति ? राजसिंहासनम् अलङ्कर्तुं भवान् किं करिष्यति ?




चित्रम्-11 (अ) भारतम्, सप्तनवत्यधिकसप्तदशशततमवर्षम् (1797)




**चित्रम्-11(ब) भारतम्,चत्वारिंशदधिकाष्टादशशततम-वर्षम् (1840)**




**चित्रम्-11 (स) भारतम्, सप्तपञ्चाशदधिकाष्टादशशततम-वर्षम् (1857)**

**चित्रम् - 11. (अ), (ब), (स)** – भारते आङ्ग्लीयानां प्रसरन्ती सत्ता।
एतानि मानचित्राणि भारतस्य वर्तमानराजनैतिकमानचित्रेण सह संस्थाप्य पश्यन्तु। त्रिषु मानचित्रेषु तानि क्षेत्राणि परिचिन्वन्तु यानि क्षेत्राणि ब्रिटिशशासनान्तर्गतानि न आसन्।

## नूतनशासनस्य स्थापना

गवर्नरजनरल इति पदारूढः वारेनहेस्टिंग्सः त्रिसप्तत्यधिकसप्तदशशततमवर्षतः – पञ्चाशीत्यधिकसप्तदशशततमवर्षकालावधौ (1773-1785) तेषु बहुषु महत्त्वपूर्णेषु जनेषु कश्चित् एकः आसीत् यः ईस्ट-इण्डिया-कम्पनी इति संस्थायाः शक्तिविस्तारे महत्त्वपूर्णां भूमिकाम् उढवान्। यदा वारेन-हेस्टिंग्सः प्रशासकः जातः तदा ईस्ट-इण्डिया-कम्पनी इति संस्था न केवलं बङ्गाले एव अपि तु बम्बईमद्रासयोः सत्ताम् अर्थात् शासनाधिकारम् अपि प्राप्तवती । ब्रिटिशक्षेत्राणि स्थूलतया प्रशासकीयघट्टेषु विभक्ताः आसन् ये आवासीयकार्यालयाः(प्रेजिडेंसी) इति रूपेण उच्यन्ते स्म। तस्मिन् काले प्रेजिडेंसीत्रयम् आसीत् – बङ्गाल-मद्रास-बम्बयी-महानगराणि । प्रत्येकं शासनं राज्यपालस्य पार्श्वे भवति स्म । सः सर्वोच्चराष्ट्राध्यक्षः(गवर्नरजनरल इति) भवति स्म । वारेनहेस्टिंग्सः अनेकानि प्रशासकीयसंशोधनानि अकरोत् । न्यायक्षेत्रे तस्य संशोधनानि विशेषतया उल्लेखनीयानि आसन्।

द्विसप्तत्यधिकसप्तदशशततम-वर्षात् (1772) काचित् नूतना न्यायव्यवस्था स्थापिता । एतस्याः व्यवस्थायाः अन्तर्गतं प्रावधानं कृतं यत् प्रत्येकं जनपदे द्वौ न्यायालयौ भविष्यतः – दण्डाधिकरणीय-न्यायालयः (फौजदारीन्यायालयः) राजसभीय-न्यायः (दीवानीन्यायालयः) च। दीवानीन्यायालयानां प्रमुखाः यूरोपीयमण्डलाधीक्षकाः भवन्ति स्म । तेषां यूरोपीयमण्डलाधीक्षकाणां मार्गदर्शनं मौलवीजनाः हिन्दुपण्डिताः च भारतीयाधिनियमानां व्याख्यां कृत्वा कुर्वन्ति स्म । सैन्यन्यायालयाः अधुना अपि काजी-मुफ्ती इत्येतयोः(मुस्लिमन्यायाधीशयोः) अन्तर्गताः आसन् । परन्तु ते अपि मण्डलाधीक्षकस्य मार्गदर्शनेन कार्यं कुर्वन्ति स्म।

**काजी** – कश्चित् मुस्लिमन्यायाधीशः।

**मुफ्ती** – मुस्लिमसमुदायस्य कश्चित् न्यायविद् यः अधिनियमानां व्याख्यानं करोति। काजी-परामृष्ट-न्यायानुसारं सः निर्णयान् श्रावयति।

**महाभियोगः** – यदा इङ्लैण्डस्य हाउस आफ कामंस इत्यस्मिन् कम् अपि जनं विरुध्य दुराचरणस्य आरोपः अरोप्यते तदा हाउस आफ लार्ड्स (संसदः उपरिसदने) इत्यस्मिन् तं जनं विरुध्य अभियोगः चलति । एषः एव महाभियोगः इति उच्यते।



**चित्रम्** - 12 – वारेन-हेस्टिंग्स-महोदये अभियोगः,आर.जी.पालार्डद्वारा चित्रितम्,एकोननवत्यधिकसप्तदशशततमवर्षम् (1789)

यदा वारेनहेस्टिंग्सः पञ्चाशीत्यधिकसप्तदशशततमे-वर्षे (1785) इंग्लैण्डं प्रतिगतवान् तदा तत्र ऐडमण्डवर्केवर्यः तस्योपरि आरोपणम् आरोपितवान् यत् तेन बङ्गालस्य शासनं समीचीनतया न चालितम्। एतस्य आरोपणस्य कारणात् हेस्टिंग्सस्य उपरि ब्रिटिशसंसदि **महाभियोगः** चालितः, यः महाभियोगः सप्तवर्षाणि यावत् अचलत्।

काचित् महती समस्या इयम्  आसीत् यत् ब्राह्मणपण्डिताः धर्मशास्त्राणां पृथक् पृथक् शाखानाम् अनुसारं स्थानीयाधिनियमानां पृथक्तया व्याख्यानं कुर्वन्ति स्म। एताः पृथक्ताः समापयितुं समतां च आनेतुं १७७५तमवर्षे ११पण्डितेभ्यः भारतीयाधिनियमानां किञ्चित् सङ्कलनं सज्जीकर्तुं कार्यम् अर्पितम् । एन.बी.हालहेडमहोदयः एतस्य सङ्कलनस्य आङ्ग्लभाषया अनुवादम् अकरोत् । १७७८तमवर्षं यावत् यूरोपीयन्यायाधीशेभ्यः मुस्लिमाधिनियमानां काचित् संहिता सज्जीकृता । १७७३ तमवर्षस्य रेग्युलेटिंगाधिनियमस्य अन्तर्गतम् एकस्य नूतनस्य सर्वोच्चन्यायालयस्य स्थापना कृता । एतदतिरिच्य कलकत्तायां निवेदनीय (अपीलीय)-सदर-निजामत-न्यायालयस्य अपि स्थापना कृता।

भारतीयजनपदे जनपदाधीक्षकपदं (क्लेक्टर)सर्वोच्चपदं भवति स्म। यथा नाम्ना एव ज्ञायते,तस्य प्रमुखकार्यं राजस्वस्य एकत्रीकरणं न्यायाधीशानाम् आरक्षकाधिकारिणाम् आरक्षकानां च साहाय्येन जनपदे अधिनियमीयव्यवस्थायाः च क्रियान्वयनं भवति स्म । तस्य कार्यालयः – कलेक्टरेट- इति अर्थात् सत्तासंरक्षणयोः नूतनकेन्द्रं जातम् आसीत्, येन पुरातनसत्ताकेन्द्राणि अनुपयुक्तानि कृतानि।

## संस्थायाः (कम्पनी) सेना

ईस्ट-इण्डिया-कम्पनी इति संस्थायाः आगमनेन सह एव भारते प्रशासनिक-संशोधनानां दृष्ट्या नूतनविचाराः तु आगताः परन्तु तस्याः वास्तविकी सत्ता सैन्यशक्तौ आसीत्। मुगलसैन्यं मुख्यरूपेण प्रशिक्षिताश्वारोहिरूपेण पदातिः च आसीत्। तेभ्यः शरसन्धानस्य खड्गचालनस्य च प्रशिक्षणं दीयते स्म। सेनायाम् अश्वरोह्यादीनां प्रभावः भवति स्म, तथा च मुगलसाम्राज्येण कस्याश्चित् विशाल-व्यवसायिक-प्रशिक्षित-पदाति-सेनायाः आवश्यकता न अनुभूयते स्म । ग्रामीणक्षेत्रेषु सशस्त्रकृषकाणां व्यापकसङ्ख्या आसीत् । स्थानीयभूस्वामिनः मुगलेभ्यः आवश्यकतायां सत्यां पदातिसैनिकानाम् उपलब्धतां कारयन्ति स्म।

अष्टादशशताब्दे यदा अवध-बनारससदृशेषु राज्येषु कृषकान् सेनां प्रवेश्य तेभ्यः अपि व्यवसायिकसैन्यप्रशिक्षणं दातुं मुगलाः आरब्धवन्तः, तदा स्थितिः परिवर्तितुम् आरब्धा । ईस्ट-इण्डिया-कम्पनीद्वारा स्वसैन्याय सैनिकप्रवेशप्रक्रिया आरब्धा तया अपि मुगलवत् एव प्रक्रिया अङ्गीकृता। आङ्ग्लीयाः स्वसेनायै सिपॉयार्मी (सेना) (सिपाय इति शब्दः भारतीय- "सिपाही" इति शब्दस्यैव विकृतरूपम् अस्ति) इति पदस्य प्रयोगं कुर्वन्ति स्म।

विंशत्यधिकाष्टादशशततम-दशकात् (1820) यथा यथा युद्धकला परिवर्तितुम् आरब्धा ईस्ट-इण्डिया-कम्पनी-सेनायाम् सादिसैन्यदलानाम् आवश्यकता न्यूना जाता। तत्र कारणम् इदम् आसीत् यत् ब्रिटिशसाम्राज्यं बर्मा-अफगानिस्तान-मिश्रेषु अपि युद्ध्यते स्म तत्रत्याः सैनिकाः मस्केट-मैचलाक इत्यादिभुशुण्डिभिः समन्विताः भवन्ति स्म। ईस्ट-इण्डिया-कम्पनी इति संस्थायाः सेनायाः सैनिकैः परिवर्तितसैन्यावश्यकतानाम् अवधानं करणीयं भवति स्म तथा च अधुना तेषां पदातिसैन्यसमूहः अधिकमहत्त्वपूर्णः जायते स्म।

एकोनविंशतिशताब्दस्य आरम्भे आङ्ग्लीयाः कस्याश्चित् समरूपसैनिकसंस्कृतेः विकासम् आरब्धवन्तः आसन् । सैनिकाः यूरोपीयशैल्या प्रशिक्षणम् अभ्यासः

---

"अहं सर्वेषां शत्रुम् उत्पीडकं च अभिलक्ष्य महाभियोगं चालयामि।"

वारेन-हेस्टिंग्स-विषयके महाभियोगे चर्चाकाले ऐडमण्डबर्कमहोदयः उत्तेजनापूर्णभाषणम् अददात् तस्य भाषणस्य कश्चित् अंशः अत्र प्रस्तूयते

एडमण्डवर्केवर्यः अवदत् यत् अहं तस्य (हेस्टिंग्सस्य) उपरि भारतीय-जनानां पक्षतः महाभियोगं चालयामि येषां जनानाम् अधिकारान् सः सर्वथा नष्टीकृतवान्, येषां जनानां देशं सः मरुस्थलं कृतवान् । अन्ते अहं मानवस्वभावनाम्नि स्त्रीपुरुष-नाम्नि सर्वायुवर्गजननाम्नि पदधारिनाम्नि सर्वेषां च सामूहिकशत्रोः उत्पीडकस्य च उपरि महाभियोगं चालयामि।

**धर्मशास्त्रम्** – संस्कृतस्य तादृश्यः कृतयः यासु सामाजिक-व्यवहारस्य आचरणस्य सिद्धान्तानां च व्याख्यानं क्रियते ताः कृतयः धर्मशास्त्ररूपेण उच्यन्ते । धर्मशास्त्राणि ईसापूर्वं ५०० वर्षेभ्यः अपि पूर्वं लिखितानि आसन्।

**आरोही (सवार - अश्वारोही**

**मस्केट** – (दीर्घभुशुण्डी) – पदाति-सैनिकैः प्रयुज्यमाना दीर्घभुशुण्डी।

**मैचलाक** – (पुराभुशुण्डी) – प्रारम्भिककालिका भुशुण्डिः, यस्यां स्फोटकचूर्णम् अग्निश्लाकया प्रज्वाल्यते स्म।



**चित्रम्** 13- संस्थायाः कार्यकर्ता बङ्गालस्य सादी, केनचित् अज्ञातेन भारतीयचित्रकारेण निर्मितं चित्रम्, अशीत्यधिकसप्तदशशततम-वर्षम् (1780).

मराठामैसूरसैन्यदलाभ्यां सह जातयुद्धानां पश्चात् ईस्ट-इण्डिया-संस्था स्वसादि-सैन्यदलस्य द्रढीकरणस्य महत्त्वम् अवगतवती।

अनुशासनं च शिक्ष्यन्ते स्म। अधुना तेषां जीवनं पूर्वापेक्षया अपि आधिक्येन नियन्त्रितम् आसीत्। एतस्मिन् प्रयासे कृते सति कदाचित् समस्याः अपि पुरतः आयान्ति स्म यतोहि प्रशिक्षितसैनिकानां सेनायाः नियोजनस्य काले आङ्ग्लीयाः कदाचित् जातेः समुदायस्य च भावनानाम् अपि अवहेलनं कुर्वन्ति स्म । कामं जनाः कथं स्वजातीयभावनाः धार्मिकभावनाविषये च एतवत्या सरलतया कथं त्यक्तुं शक्नुवन्ति स्म ? किं ते आत्मानं स्वसमुदायस्य सदस्यरूपेण अदृष्ट्वा केवलं सैनिकम् एव मन्तुं शक्नुवन्ति स्म ?

सैनिकाः किम् अनुभवन्ति स्म ? स्वजीवनं स्वपरिचयं च, अर्थात् ते के सन्ति ?, एतं विचारम् अनुभूय यानि परिवर्तनानि जायमानानि आसन्, तानि परिवर्तनानि सैनिकाः कथं दृष्टवन्तः ? सप्तपञ्चाशदधिकाष्टादशशत-तमवर्षस्य (1857) विद्रोहेण वयं जानीमः यत् सैनिकाः तेषां मनोगतभावाः च के आसन् ? इति। एतस्य विद्रोहस्य विषये भवन्तः पञ्चमे अध्याये पठिष्यन्ति।

## निष्कर्षः

ईस्ट-इण्डिया-संस्था वाणिज्यिकसंस्थायाः विस्तारद्वारा कालक्रमेण भौगोलिकी औपनिवेशिकी च शक्तिरूपेण परिणता । एकोनविंशत्याः शताब्द्याः आरम्भे नूतनवाष्पप्रविधेः प्रयोगेण एषा प्रक्रिया इतोऽपि तीव्रा जाता। तावत्पर्यन्तं समुद्रमार्गेण भारतं प्राप्तुं षड् अष्टौ वा मासाः लगन्ति स्म। वाष्पद्वारा चाल्यमानैः यानैः एषा यात्रा सप्ताहत्रयेण भवति स्म। तदनन्तरं बहवः आङ्ग्लीयाः सकुटुम्बं भारतसदृशं सुदूरदेशम् आगन्तुं प्रारब्धवन्तः।

सप्तपञ्चाशदुत्तर-अष्टादशशततम-वर्षे (1857) यावत् भारतीयोपमहाद्वीपस्य त्रिषष्टि-(63) प्रतिशतं भूभागे तथा च अष्टसप्तति-(78)प्रतिशतं जनसङ्ख्यायां संस्थया साक्षात् शासनं स्थापितम् आसीत्। देशस्य शिष्टे भूभागे जनसंख्यायां च संस्थायाः अप्रत्यक्षः प्रभावः आसीत् अनेन प्रकारेण व्यवहारिकस्तरेण ईस्ट-इण्डिया-संस्था सम्पूर्णं भारतं स्वनियन्त्रणे स्वीकृतवती आसीत्।

## अन्यत्र

### दक्षिणाफ्रीकायां दासवाणिज्यम्



डचवाणिजः सप्तदशशताब्दे दक्षिणाफ्रीकां प्राप्तवन्तः । शीघ्रम् एव तत्र दासवाणिज्यम् आरब्धम् । जनान् बन्धकान् कृत्वा ऋङ्खलाभिः बद्ध्वा दासविपणिषु विक्रेतुम् आरब्धाः। चतुस्त्रिंशदुत्तराष्टादश-शततम-वर्षे (1834) दासप्रथायाः अन्तकाले अफ्रीकायाः दक्षिणकोणे स्थिते केप इत्यस्मिन् निजस्वामित्वे दासानां सङ्ख्या चतुः सप्तत्यधिकसप्तशदुत्तरषड्त्रिंशत्सहस्रम् (36,774) आसीत्।

चतुर्विंशत्यधिकाष्टदशशततमे वर्षे (1424) केप इत्यस्य यात्री तत्रत्यस्य साक्षात्कारकृतस्य लीलामयक्रयस्य विवरणं प्रस्तौति –

"एतस्यां सूचनायां प्राप्तायां सत्यां यत् पशूनां कृष्युत्पादानां लीलामयक्रयणं भविष्यति.. अस्माभिः स्वशकटं नूतनवृषभौ क्रेतुं स्थगितम्। लीलामयक्रीयमाणायां सामग्र्याः अन्तर्गतं काचित् स्त्रीदासी तस्याः च त्रयः बालकाः आसन्। कृषकाः पशुवत् एव तान् परीक्षितवन्तः । ते स्त्रिशिश्वादयः पृथक्पृथक् विक्रेतृभ्यः विक्रापयिताः । माता चिन्तया वेदनया अश्रुपूर्णनेत्राभ्यां च शिशून् प्रति अपश्यत्। दुःखिताः बालाः व्याकुलतया मातापितरौ आश्लिष्टवन्तः। एतत् हृदयविदारकं दृश्यम् आसीत्। तत्र विपरीता स्थितिः अपि अस्माभिः दृष्टा तत्र विद्यमानदर्शकानां स्मितमुखानि आसन्, ते च असंवेदनशीलाः आसन्।

नाईजल-वोर्डनद्वारा लिखितम्, द चेनस देट बायण्ड अस : ए हिस्ट्री आफ सलेवरी एट द केप,षण्णवत्यधिकैकोनविंशतिशततमवर्षम् (1996)

### आगच्छन्तु, कल्पयामः

भवन्तः अष्टादशशताब्द्याः अन्तिमे अथवा एकोनविंशतिशताब्द्याः आरम्भे इङ्ग्लैण्डदेशे निवसन्ति । ब्रिटिशविजयस्य कथाविषये भवतां का प्रतिक्रिया भविष्यति ? स्मरन्तु यत् भवन्तः तत्र अनेकेषां गच्छताम् अधिकारिणाम् अगणितधनार्जनस्य च विषये ज्ञातवन्तः।

## पुनः स्मरन्तु -

1. निम्नलिखितस्य युग्म रचयन्तु

| | |
|---|---|
| दीवानी | टीपुसुल्तानः |
| "शेर-ए-मैसूरः" | भूराजस्वसङ्ग्रहणस्य अधिकारः |
| फौजदारीन्यायालयः | सिपाय इति |
| रानीचेन्नम्मा | भारतस्य प्रथमराष्ट्राध्यक्षः(गवर्नरजनरल) इति |
| सैनिकः | सैन्यन्यायालयः (फौजदारीन्यायालयः) |
| वारेन-हेस्टिंग्समहोदयः | कित्तूरे आङ्ग्लविरोधिनः आन्दोलनस्य नेतृत्वम् अकरोत् |

2. रिक्तस्थानानि पूरयत –

क) बङ्गप्रान्ते आङ्ग्लीयानां जयः --- इत्यस्य जयात् आरब्धा।

ख) हैदरालिटीपूसुल्तानौ ---शासकौ आस्ताम्।

ग) डलहौजी –इत्यस्य सिद्धान्तं क्रियान्वयितवान्।

घ) मराठाराज्यानि मुख्यरूपेण भारतस्य ---भागे स्थितानि आसन्।

3. उचितम् अनुचितं च ज्ञापयन्तु –

क) मुगलसाम्राज्यम् अष्टादशशताब्दे दृढताम् प्राप्तवत्।

ख) इङ्ग्लिश-ईस्ट-इण्डिया इति संस्था भारतेन सह वाणिज्यकर्त्री एकमात्रं यूरोपीयसंस्था आसीत्।

ग) महाराजः रणजीतसिंहः पञ्चनदस्य राजा आसीत्।

घ) आङ्ग्लीयाः स्वाधिकृतक्षेत्रेषु कानिचन अपि शासकीयपरिवर्तनानि न अकुर्वन्।

## आगच्छन्तु विचारयामः –

4. यूरोपीयव्यापारिकसंस्थाः भारतं प्रति किमर्थम् आकृष्टाः भवन्ति स्म ?

5. बङ्गप्रान्तस्य शासकानाम् (नवाब) ईस्ट-इण्डिया-कम्पनी इति संस्थायाः च मध्ये कान् विषयान् अभिलक्ष्य विवादाः आसन् ?

6. भूप्रशासनिकाधिकारस्य अथवा सत्तायाः( दीवानी इति) प्राप्तेः पश्चात् ईस्ट-इण्डिया इति संस्था कथं लाभान्विता जाता ?

7. ईस्ट-इण्डिया इति संस्था टीपूसुल्तानात् किमर्थं बिभेति स्म ?

8. “सहायक-सन्धिः” (“सब्सिडियरी-एलायंस”) इत्यस्याः व्यवस्थायाः व्याख्यां कुर्वन्तु।

9. संस्थायाः शासनं भारतीय-नृप-शासनात् कथं भिन्नम् आसीत् ?

10. संस्थायाः सेनायाः संरचनायाम् आगतानां परिवर्तनानां वर्णनं कुर्वन्तु।

## आगच्छन्तु कृत्वा पश्यामः –

11. बङ्गप्रान्ते आङ्ग्लीयानां जयात् पश्चात् कलकत्तामहानगरं लघुग्रामात् परिवर्त्य महानगररूपेण परिवर्तितम् । औपनिवेशिककाले नगरीय-यूरोपीयसंस्कृत्तेः भारतीयनिवासिनां संस्कृत्तेः, शिल्पजीवनयोः च विषये जानन्तु।

12. निम्नलिखितेषु कञ्चित् जनम् आधारीकृत्य चित्राणि कथाः कविताः सूचनाः च एकत्रीकुर्वन्तु – तद्यथा – झांसीमहिष्याः, महादजीसिन्धियायाः, हैदरालिवर्यस्य, महाराज-रणजीतसिंहस्य, लार्ड-डलहौजिवर्यस्य, अथवा भवनानां क्षेत्रे जातस्य कस्यचित् पुरातनस्य शासकस्य च विषये।

॥ इति द्वितीयोऽध्यायः ॥